श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नामरामायणम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नामरामायणम् ॥

## ओं श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्रपरब्रह्मणे नमः

## बालकाण्डम्

| | |
|---|---|
| 1 | शुद्धब्रह्मपरात्पर राम |
| 2 | कालात्मकपरमेश्वर राम |
| 3 | शेषतल्पसुखनिद्रित राम |
| 4 | ब्रह्माद्यमरप्रार्थित राम |
| 5 | चण्डकिरणकुलमण्डन राम |
| 6 | श्रीमद्दशरथनन्दन राम |
| 7 | कौसल्यासुखवर्धन राम |
| 8 | विश्वामित्रप्रियधन राम |
| 9 | घोरताटकाघातक राम |
| 10 | मारीचादिनिपातक राम |
| 11 | कौशिकमखसंरक्षक राम |
| 12 | श्रीमदहल्योद्धारक राम |
| 13 | गौतममुनिसम्पूजित राम |

| | |
|---|---|
| 14 | सुरमुनिवरगणसंस्तुत राम |
| 15 | नाविकधावितमृदुपद राम |
| 16 | मिथिलापुरजनमोहक राम |
| 17 | विदेहमानसरञ्जक राम |
| 18 | त्र्यम्बककार्मुकभञ्जक राम |
| 19 | सीतार्पितवरमालिक राम |
| 20 | कृतवैवाहिककौतुक राम |
| 21 | भार्गवदर्पविनाशक राम |
| 22 | श्रीमदयोध्यापालक राम |
| | राम राम जय राजा राम |
| | राम राम जय सीता राम |

## अयोध्याकाण्डम्

| | |
|---|---|
| 23 | अगणितगुणगणभूषित राम |
| 24 | अवनीतनयाकामित राम |
| 25 | राकाचन्द्रसमानन राम |
| 26 | पितृवाक्याश्रितकानन राम |
| 27 | प्रियगुहविनिवेदितपद राम |
| 28 | तत्क्षालितनिजमृदुपद राम |

| | |
|---|---|
| 29 | भरद्वाजमुखानन्दक राम |
| 30 | चित्रकूटाद्रिनिकेतन राम |
| 31 | दशरथसन्ततचिन्तित राम |
| 32 | कैकेयीतनयार्थित राम |
| 33 | विरचितनिजपितृकर्मक राम |
| 34 | भरतार्पितनिजपादुक राम |
| | राम राम जय राजा राम |
| | राम राम जय सीता राम |

## अरण्यकाण्डम्

| | |
|---|---|
| 35 | दण्डकावनजनपावन राम |
| 36 | दुष्टविराधविनाशन राम |
| 37 | शरभङ्गसुतीक्ष्णार्चित राम |
| 38 | अगस्त्यानुग्रहवर्धित राम |
| 39 | गृध्राधिपसंसेवित राम |
| 40 | पञ्चवटीतटसुस्थित राम |
| 41 | शूर्पणखार्तिविधायक राम |
| 42 | खरदूषणमुखसूदक राम |
| 43 | सीताप्रियहरिणानुग राम |

| | |
|---|---|
| 44 | मारीचार्तिकृदाशुग राम |
| 45 | विनष्टसीतान्वेषक राम |
| 46 | गृध्राधिपगतिदायक राम |
| 47 | शबरीदत्तफलाशन राम |
| 48 | कबन्धबाहुच्छेदन राम |
| | राम राम जय राजा राम |
| | राम राम जय सीता राम |

## किष्किन्धाकाण्डम्

| | |
|---|---|
| 49 | हनुमत्सेवितनिजपद राम |
| 50 | नतसुग्रीवाभीष्टद राम |
| 51 | गर्वितवालिसंहारक राम |
| 52 | वानरदूतप्रेषक राम |
| 53 | हितकरलक्ष्मणसंयुत राम |
| | राम राम जय राजा राम |
| | राम राम जय सीता राम |

## सुन्दरकाण्डम्

| | |
|---|---|
| 54 | कपिवरसन्ततसंस्मृत राम |
| 55 | तद्गतिविघ्नध्वंसक राम |
| 56 | सीताप्राणाधारक राम |
| 57 | दुष्टदशाननदूषित राम |
| 58 | शिष्टहनूमद्भूषित राम |
| 59 | सीतावेदितकाकावन राम |
| 60 | कृतचूडामणिदर्शन राम |
| 61 | कपिवरवचनाश्वासित राम |
| | राम राम जय राजा राम |
| | राम राम जय सीता राम |

## युद्धकाण्डम्

| | |
|---|---|
| 62 | रावणनिधनप्रस्थित राम |
| 63 | वानरसैन्यसमावृत राम |
| 64 | शोषितसरिदीशार्थित राम |
| 65 | विभीषणाभयदायक राम |
| 66 | पर्वतसेतुनिबन्धक राम |
| 67 | कुम्भकर्णशिरच्छेदक राम |

| | |
|---|---|
| **68** | राक्षससङ्घविमर्दक राम |
| **69** | अहिमहिरावणचारण राम |
| **70** | संहृतदशमुखरावण राम |
| **71** | विधिभवमुखसुरसंस्तुत राम |
| **72** | खस्थितदशरथवीक्षित राम |
| **73** | सीतादर्शनमोदित राम |
| **74** | अभिषिक्तविभीषणनत राम |
| **75** | पुष्पकयानारोहण राम |
| **76** | भरद्वाजाभिनिषेवण राम |
| **77** | भरतप्राणप्रियकर राम |
| **78** | साकेतपुरीभूषण राम |
| **79** | सकलस्वीयसमानत राम |
| **80** | रत्नलसत्पीठास्थित राम |
| **81** | पट्टाभिषेकालङ्कृत राम |
| **82** | पार्थिवकुलसम्मानित राम |
| **83** | विभीषणार्पितरङ्गक राम |
| **84** | कीशकुलानुग्रहकर राम |
| **85** | सकलजीवसंरक्षक राम |

| | |
|---|---|
| 86 | समस्तलोकाधारक राम |
| | राम राम जय राजा राम |
| | राम राम जय सीता राम |

## उत्तरकाण्डम्

| | |
|---|---|
| 87 | आगतमुनिगणसंस्तुत राम |
| 88 | विश्रुतदशकण्ठोद्भव राम |
| 89 | सीतालिङ्गननिर्वृत राम |
| 90 | नीतिसुरक्षितजनपद राम |
| 91 | विपिनत्याजितजनकज राम |
| 92 | कारितलवणासुरवध राम |
| 93 | स्वर्गतशम्बुकसंस्तुत राम |
| 94 | स्वतनयकुशलवनन्दित राम |
| 95 | अश्वमेधक्रतुदीक्षित राम |
| 96 | कालावेदितसुरपद राम |
| 97 | आयोध्यकजनमुक्तिद राम |
| 98 | विधिमुखविबुधानन्दक राम |
| 99 | तेजोमयनिजरूपक राम |
| 100 | संसृतिबन्धविमोचक राम |

| | |
|---|---|
| **101** | धर्मस्थापनतत्पर राम |
| **102** | भक्तिपरायणमुक्तिद राम |
| **103** | सर्वचराचरपालक राम |
| **104** | सर्वभवामयवारक राम |
| **105** | वैकुण्ठालयसंस्थित राम |
| **106** | नित्यानन्दपदस्थित राम |
| **107** | राम राम जय राजा राम |
| **108** | राम राम जय सीता राम |

॥ इति श्री नामरामायणं समाप्तम् ॥